दिनाङ्क:-23.12.2025

प्रात: - 06:55

<u>भारत-न्यूज़ीलैण्ड – मुक्तव्यापारसमन्वय:</u>

भारत-न्यूज़ीलैण्ड-देशौ ऐतिहासिकं, परस्पर-लाभप्रदं च मुक्तव्यापारसमन्वयं सफलतया सम्पन्नं कृतवन्तौ। ह्य: प्रधानमन्त्रिणा नरेन्द्रमोदिना न्यूज़ीलैण्ड-देशस्य प्रधानमन्त्रिणा क्रिस्टोफर लक्सन इत्यनेन च सह घोषितम्। श्रीमोदी ह्य: श्रीलक्सन इत्यनेन सह दूरभाषया वार्तालापम् कृतवान्। अस्मिन् वर्षे मार्च-मासे श्री-लक्सन इत्यस्य भारतयात्रायाः समये वार्तालापस्य आरम्भः अभवत्। प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत्, भारत-न्यूज़ीलैण्ड-देशयोः मध्ये एफ.टी.ए. इत्यनेन आगामिषु पञ्चवर्षेषु द्वैपाक्षिकव्यापारं द्विगुणीकर्तुं मञ्चः निर्मितः अस्तीति। सामाजिकान्तर्जालीये सन्देशे श्रीमोदी अवदत् यत्, भारत-न्यूज़ीलैण्ड-देशयोः सहभागित्वमं नूतनम् औन्नत्यं प्राप्नुयादिति। सः अवदत् यत्, भारतं न्यूज़ीलैण्ड-देशात् विविधक्षेत्रेषु प्रायः द्विसहस्र-कोटिरुप्यकाणां निवेशानां स्वागतं करोति। सामाजिकान्तर्जालीये सन्देशे श्रीलक्सनेन निर्णयस्य प्रशंसां कृता।

ह्य: नवदिल्ल्यां वार्ताहरान् सम्बोधयन् केन्द्रीय-वाणिज्य-उद्योग-मन्त्री पियूष-गोयलः अवदत् यत् एफ़.टी.ए. इत्यनेन कृषकाणां, उद्यमशीलानां, छात्राणां, महिलानां, नवप्रवर्तकानां च कृते व्यापारस्य निर्माणं कृत्वा विविधाः अवसराः निर्मिताः भविष्यन्ति।

श्री गोयलः दृढतया उक्तवान् यत् एफ़.टी.ए. इतीदं विश्वस्य भूराजनीतेः विषये भारतस्य वर्धमानं सामरिकं महत्त्वं प्रतिबिम्बयति।

## अरावली- भूपेन्द्रः

केन्द्रीय-पर्यावरण-वन्य- ऋतुदशा-परिवर्तन-मन्त्री भूपेन्द्र-यादवः अधोरेखितवान् यत् अरावली-क्षेत्रस्य विषये सर्वोच्चन्यायालयस्य निर्णयः अरावली-हरित-भित्ति-परियोजनायाः माध्यमेन एनं क्षेत्रं रक्षणाय सर्वकारस्य बहुविध-प्रयासानां स्वीकरणं समर्थनं च करोति। मन्त्रिणा ह्यः नवदिल्ल्यां वार्ताहरान् सम्बोधयन् इदमुक्तम्। सः अवदत् यत् यावत् भारतीय-वानिकी-अनुसन्धान-शिक्षा-परिषदा - आई.सी.एफ्.आर्.ई. इत्यनेन सुस्थिर-खननस्य विस्तृत-प्रबन्धन-योजना निर्मिता न भविष्यति तावत् नूतन-खनन-दायित्वं न प्रदीयते।

## गोवा-ज़िला-पञ्चायत्

गोवा-जिला-पञ्चायत्-निर्वाचने भाजपा-एम्.जी.पी.-घटबन्धनेन बहुसंख्यायां आसनानि विजितं, यस्य परिणामः ह्यः घोषितः। राज्यस्य पञ्चाशत् जिला-पञ्चायत्-आसनेषु त्रिंशत् तः अपि अधिकानि आसनानि उभौ विजितवन्तौ, काङ्ग्रेस्-दलेन दश आसनानि, आप-दलेन तथा रिवोल्यूशनरी-गोवन्स-दलेन च एकं-एकं आसनं विजितं। दिसम्बर विंशति दिनाङ्के जाते निर्वाचने चत्वारः स्वतन्त्र- प्रत्याशिनः अपि विजितवन्तः।

## हरियाणा-कर्मचारी

हरियाणा-विधानसभया प्रतिदिनस्य कार्यसमयः नव होरा तः दशहोरा यावत् वर्धितं, अपि च आपणेषु, निजी-वाणिज्य-संस्थासु कर्मचारिणां कृते अष्टचत्वारिंशत् होरायाः समग्र-साप्ताहिक-सीमाम् अवलम्ब्य विधेयकं स्वीकृतम्। हरियाणा-शाप्स् अण्ड् कमर्शियल्-इस्टेब्लिशमेण्ट्स् (अमन्मेण्ट्) बिल्, विंशति-पञ्चविंशति इति हरियाणा-शाप्स् अण्ड् कमर्शियल्-इस्टेब्लिशमेण्ट्स् एक्ट, ऊनविंशति-अष्टपञ्चाशत् इत्येतस्मिन् संशोधनाय अनुमोदितम्।

## महिला-क्रिकेट्

महिला-क्रिकेट्-क्रीडायां, अद्य विशाखापत्तनम्-नगरस्य क्रीडाङ्गणे, पञ्च-क्रीडा-श्रृङ्खलायाः द्वितीयायां विंशति-प्रति-विंशति-अन्ताराष्ट्रिय-क्रीडायां भारतीय-महिला-दलं श्रीलङ्का-महिला-दलं सम्मुखी करिष्यति। क्रीडायाः आरम्भः सायं सप्तवादने भविष्यति।